**सर्वस्वदक्षिण** पु० सर्वस्वं दक्षिणा यत्र । विश्वजिन्नामकयागभेदे सर्ववेदसशब्दे दृश्यम् । [२सकलहितहेतौ त्रि० ।

**सर्वहित** न० सर्वेषां हितम् । १मरिचे राजनि० ५व० ।

**सर्वाङ्गसुन्दर** पु० औषधभेदे "रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खमवनीय समांशतः । हेमभस्मार्द्धभागञ्च सर्वं खल्ले निधापयेत् । निम्बुद्रवस्य योगेन पिष्टिकां कारयेद्भिषक् । पश्चात् गजपुटं दद्यात् शीतलञ्च समुद्धरेत् । हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धो दरदो मतः । एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् । ततः पूजां प्रकुर्वीत भक्षयेत् दिवसे शुभे । सर्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः । वातपित्तज्वरे घोरे सन्निपाते सुदारुणे । अर्शःसु ग्रहणीरोगे मेहे गुल्मे भगन्दरे । निहन्ति वातजान् रोगान् श्लैष्मिकांश्च विशेषतः । पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा । भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा । गुडूचीरससहितं प्रमेहे च विशेषतः । रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः । राजिकाहिङ्गुतैलाम्लं लवणाद्यं विवर्जयेत्" भैषज्यरत्ना० । अत्र हेमभस्मनः सर्वद्रव्यार्द्धत्वमिति मतान्तरम् ।

**सर्वाङ्गीण** त्रि० सर्वाण्यङ्गानि व्याप्नोति ख । सर्वावयवव्यापके "सर्वाङ्गीणो नखत्वचे" इति भट्टिः ।

**सर्वाणी** स्त्री सर्वेभ्य आनयति मोक्षं आ+नी-ड पूर्वपदादिति णत्वम् । दुर्गायाम् "सर्वान् मोक्षान् प्रापयति जन्ममृत्युजरादिकम् । चराचरांश्च विश्वस्थान् सर्वाणी तेन कीर्त्तिता" ब्रह्मवै० प० ५४अ० तन्निरुक्तिः ।

**सर्वानुकारिणी** स्त्री सर्वमनुकरोति अनु+कृ-णिनि ङीप् । १शालपर्ण्याम् राजनि० २सकलसदृशे त्रि० स्त्रियां ङीप् ।

**सर्वानुभूति** स्त्री सर्वैषामनुभूतिर्यत्र । १श्वेतत्रिवृतायाम् अमरः २तत्त्वज्ञानिनि त्रि० ३जिनभेदे हेमच० ।

**सर्वान्नभोजिन्** त्रि० सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-णिनि । सर्वान्नभक्षके अमरः । [भक्षके अमरः

**सर्वान्नीन** त्रि० सर्वेषामन्नं सर्वमन्नं वा भुङ्क्ते ख । सर्वान्न

**सर्वाभिसन्धिन्** पु० सर्वत्र आचरणे अभिसन्धास्त्यस्य इनि । १सर्वत्राभिसन्धिमति जने २छद्मतापसे त्रिका० ।

**सर्वाभिसार** पु० अभिस्रियते अत्र अभि+सृ-भावे घञ् इत० । चतुरङ्गसैन्यसन्नाहेन युद्धयानभेदे ।

**सर्वार्थसिद्ध** पु० सर्वेषु अर्थेषु सिद्धः । १बुद्धे अमरः हेम० । २सकलाभीष्टसिद्धियुते त्रि० ।

**सर्वार्थानुसाधिनी** स्त्री "धर्मादीन् चिन्तितान् यस्मात् सर्वलोकेषु यच्छति । ततो देवी समाख्याता सा सर्वार्थानुसाधिनी" देवीपु० ४५अ० निरुक्तायां दुर्गायाम् ।

**सर्वावसर** पु० सर्वेषां कर्मणामवसरोऽपहरणं यत्र । अर्द्धरात्रे त्रिका० । [२सकलास्त्रयुते त्रि० ।

**सर्वास्त्रा** स्त्री सर्वाणि अस्त्राणि यस्याः । १देवीभेदे हेमच० ।

**सर्वाह्ण** पु० सर्वमहः टच्समा० अह्नादेशः णत्वम् । सकलदिने

**सर्वौघ** पु० सर्वेषां चतुरङ्गसैन्यानामोघो वृन्दमभिसारे यत्र । ओघीभूतसर्वसैन्याभिसारे अमरः कर्म० । २सर्वजलवेगे मेदि० ।

**सर्वौषधि** स्त्री कर्म० । "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः । मुराचम्पककर्पूरैर्युक्तः सर्वौषधिः स्मृता" इत्युक्ते कुष्ठादिद्रव्यवर्गे राजनि० । हेमाद्रौ छन्दोगपरिशिष्टे "कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचन्दनम् । वचा चम्पकमुस्तञ्च सर्वौषध्यो दश स्मृताः" ता एवोक्ताः । शब्दचन्द्रिकामेता एव सर्वौषधिगणत्वेनोक्ताः ।

**सर्वौषधिगण** पु० सर्वासामोषधीनां गणः । "मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । शठीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः" शब्दच० उक्ते द्रव्यगणे ।

**सर्षप** पु० सृ-अप षुक् च । (सरिषा) १शस्यभेदे अमरः । "सर्षपस्तु रसे पाके कटुस्निग्धः सतिक्तकः । तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः । रक्षोहरो जयेत् कण्डूकुष्ठकोठकृमिग्रहान् । यथा रक्तस्तथा गौरः किन्तु गौरोवरो मतः" तच्छाकगुणाः "कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु । अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् । सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् । तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् । कण्डूकृमिहरं दद्रुकुष्ठघ्नं रुचिकारकम्" भावप्र० । "जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः । तैश्चतुर्भिर्भवेल्लिक्षा लिक्षा षड्भिश्च सर्षपः" शब्दच० उक्ते २मानभेदे । ३खञ्जनिकायां स्त्री त्रिका० ङीष् ।

**सर्षपतैल** न० सर्षपस्य स्नेहः सर्षप+स्नेहार्थे-तैलच् । सर्षपस्नेहरूपे तैलभेदे "सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् । पित्तास्रदोषदं कृमिकुष्ठघ्नं तिलजवत्सूक्ष्मम्" राजनि० ।

**सल** न० सल-अच् । जले भरतः ।

**सलिल** न० सल-इलच् । १जले अमरः । नदैन्त्ये फलं जलवैकृतशब्दे २०७२पृ० दृश्यम् । ज्यो०उक्ते २जलदेवताके उत्तराषाढानक्षत्रे लग्नाऽधिके ३चतुर्थस्थाने च